# श्रीमद् भगवद् गीता

śrīmad bha-ga-vad gī-tā

Chapter 2 Verses 1-18

**ॐ हरिः ॐ श्री गुरुभ्यो नमः हरिः ॐ**

om hariḥ om śrī gu-ru-bhyo na-maḥ hariḥ om

**ॐ श्री कृष्णपरमात्मने नमः**

om śrī kṛṣ-ṇa-pa-ra-māt-ma-ne namaḥ

**श्रीमद् भगवद् गीता**

śrīmad bha-ga-vad gī-tā

**अथ द्वितीयोऽध्यायः।**

a-tha dvi-tī-yo'dhyā-yaḥ ।

**साङ्ख्ययोगः।**

sāṅ-khya-yo-gaḥ ।

❖ सञ्जय उवाच।

❖ sañ-jaya u-vā-ca |

तं तथा कृपयाविष्टम्
अश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यम्
उवाच मधुसूदनः॥

॥ १॥

taṁ ta-thā kṛ-pa-yā-viṣ-ṭam
aśru-pūr-ṇā-ku-lek-ṣa-ṇam |
viṣī-dan-tam-idaṁ vāk-yam
uvā-ca ma-dhu-sū-da-naḥ ||

|| 1 ||

❖ श्रीभगवानुवाच।

❖ śrī-bha-ga-vān-u-vā-ca |

कुतस्त्वा कश्मलमिदं
विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यम्
अकीर्तिकरमर्जुन॥

॥ २॥

ku-tas-tvā kaś-ma-lam-idaṁ
vi-ṣa-me sa-mu-pas-thi-tam |
anār-ya-juṣ-ṭam-as-varg-yam
a-kīr-ti-ka-ram-ar-juna ||

|| 2 ||

क्लैब्यं मा स्म गमः पार्थ
नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं
त्यक्त्वोत्तिष्ठ परन्तप॥

॥ ३॥

klaib-yaṁ mā sma ga-maḥ pārtha
nai-tat-tvay-yu-pa-pad-ya-te |
kṣud-raṁ hṛ-da-ya-daur-bal-yaṁ
tyak-tvot-tiṣ-ṭha pa-ran-ta-pa ||

|| 3 ||

❖ अर्जुन उवाच ।

❖ arjuna uvāca |

कथं भीष्ममहं सङ्ख्ये
द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि
पूजार्हावरिसूदन ॥
॥ ४ ॥

ka-thaṁ bhīṣ-mam-ahaṁ saṅ-khye
dro-ṇaṁ ca ma-dhu-sū-dana |
iṣu-bhiḥ pra-ti-yots-yā-mi
pū-jār-hā-vari-sū-dana ||
|| 4 ||

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥
॥ ५ ॥

gurū-na-hatvā hi ma-hā-nu-bhā-vān
śre-yo bhok-tuṁ bhaikṣ-yam-apī-ha lo-ke |
hatvār-tha-kā-māṁs-tu gurū-ni-hai-va
bhuñ-jī-ya bho-gān ru-dhi-ra-pra-dig-dhān ||
|| 5 ||

न चैतद्विद्मः कतरन्नो गरीयः
यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामः
तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥
॥ ६ ॥

na cai-tad-vid-maḥ ka-ta-ran-no ga-rī-yaḥ
yadvā ja-ye-ma ya-di vā no ja-ye-yuḥ |
yā-ne-va hat-vā na ji-jī-vi-ṣā-maḥ
te'-vas-thi-tāḥ pra-mu-khe dhār-ta-rāṣ-ṭrāḥ ||
|| 6 ||

| | |
|---|---|
| कार्पण्यदोषोपहतस्वभावः | kār-paṇ-ya-do-ṣo-pa-ha-ta-sva-bhā-vaḥ |
| पृच्छामि त्वां धर्मसम्मूढचेताः । | pṛc-chā-mi tvā-ṁ dhar-ma-sam-mū-ḍha-ce-tāḥ \| |
| यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे | yac-chre-yaḥ syān-niś-ci-taṁ brū-hi tan-me |
| शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ | śiṣ-yas-te'-haṁ śā-dhi māṁ tvā-ṁ pra-pan-nam\|\| |
| ॥ ७ ॥ | \|\| 7 \|\| |

| | |
|---|---|
| न हि प्रपश्यामि ममापनुद्यात् | na hi pra-paś-yā-mi ma-mā-pa-nud-yāt |
| यच्छोकमुच्छोषणमिन्द्रियाणाम् । | yac-cho-kam-uc-cho-ṣa-ṇam-in-dri-yā-ṇām \| |
| अवाप्य भूमावसपत्नमृद्धं | a-vāp-ya bhū-mā-va-sa-pat-na-mṛd-dhaṁ |
| राज्यं सुराणामपि चाधिपत्यम् ॥ | rāj-yaṁ su-rā-ṇām-api cā-dhi-pat-yam \|\| |
| ॥ ८ ॥ | \|\| 8 \|\| |

❖ सञ्जय उवाच । ❖ sañ-jaya u-vā-ca |

| | |
|---|---|
| एवमुक्त्वा हृषीकेशं | evam-uk-tvā hṛ-ṣī-ke-śaṁ |
| गुडाकेशः परन्तपः । | gu-ḍā-ke-śaḥ paran-ta-paḥ \| |
| न योत्स्य इति गोविन्दम् | na yots-ya iti go-vin-dam |
| उक्त्वा तूष्णीं बभूव ह ॥ | uk-tvā tūṣ-ṇīṁ ba-bhū-va ha \|\| |
| ॥ ९ ॥ | \|\| 9 \|\| |

| | |
|---|---|
| तमुवाच हृषीकेशः | ta-mu-vā-ca hṛ-ṣī-ke-śaḥ |
| प्रहसन्निव भारत । | pra-ha-san-ni-va bhā-ra-ta \| |
| सेनयोरुभयोर्मध्ये | se-na-yo-ru-bha-yor-madh-ye |
| विषीदन्तमिदं वचः ॥ | vi-ṣī-dan-tam-idaṁ vacaḥ \|\| |
| ॥ १० ॥ | \|\| 10 \|\| |
| ❖ श्रीभगवानुवाच । | ❖ śrī-bha-ga-vān-u-vā-ca \| |
| अशोच्यानन्वशोचस्त्वं | a-śoc-yān-an-va-śo-cas-tvaṁ |
| प्रज्ञावादांश्च भाषसे । | pra-jñā-vā-dāṁś-ca bhā-ṣa-se \| |
| गतासूनगतासूंश्च | ga-tā-sū-na-ga-tā-sūṁś-ca |
| नानुशोचन्ति पण्डिताः ॥ | nā-nu-śo-can-ti paṇ-ḍi-tāḥ \|\| |
| ॥ ११ ॥ | \|\| 11 \|\| |
| न त्वेवाहं जातु नासं | na tve-vā-haṁ jā-tu nā-saṁ |
| न त्वं नेमे जनाधिपाः । | na tvaṁ ne-me ja-nā-dhi-pāḥ \| |
| न चैव न भविष्यामः | na cai-va na bha-viṣ-yā-maḥ |
| सर्वे वयमतः परम् ॥ | sar-ve va-yam-ataḥ pa-ram \|\| |
| ॥ १२ ॥ | \|\| 12 \|\| |

| | |
|---|---|
| देहिनोऽस्मिन्यथा देहे | de-hi-no's-min-ya-thā de-he |
| कौमारं यौवनं जरा। | kau-mā-raṁ yau-va-naṁ ja-rā \| |
| तथा देहान्तरप्राप्तिः | ta-thā de-hān-ta-ra-prāp-tiḥ |
| धीरस्तत्र न मुह्यति॥ | dhī-ras-tat-ra na muh-ya-ti \|\| |
| ॥ १३ ॥ | \|\| 13 \|\| |
| मात्रास्पर्शास्तु कौन्तेय | mā-trā-spar-śās-tu kaun-te-ya |
| शीतोष्णसुखदुःखदाः। | śī-toṣ-ṇa-su-kha-duḥ-kha-dāḥ \| |
| आगमापायिनोऽनित्याः | ā-ga-mā-pā-yi-no'-nit-yāḥ |
| तांस्तितिक्षस्व भारत॥ | tāṁs-ti-ti-kṣas-va bhā-ra-ta \|\| |
| ॥ १४ ॥ | \|\| 14 \|\| |
| यं हि न व्यथयन्त्येते | yaṁ hi na vya-tha-yan-tye-te |
| पुरुषं पुरुषर्षभ। | pu-ru-ṣaṁ pu-ru-ṣar-ṣa-bha \| |
| समदुःखसुखं धीरं | sa-ma-duḥ-kha-su-khaṁ dhī-raṁ |
| सोऽमृतत्वाय कल्पते॥ | so'-mṛ-tat-vā-ya kal-pa-te \|\| |
| ॥ १५ ॥ | \|\| 15 \|\| |

| | |
|---|---|
| नासतो विद्यते भावः | nā-sa-to vid-ya-te bhā-vaḥ |
| नाभावो विद्यते सतः । | nā-bhā-vo vid-ya-te sa-taḥ । |
| उभयोरपि दृष्टोऽन्तः | u-bha-yor-api dṛṣ-ṭo'n-taḥ |
| त्वनयोस्तत्त्वदर्शिभिः ॥ | tva-na-yos-tat-tva-dar-śi-bhiḥ ।। |
| ॥ १६ ॥ | ।। 16 ।। |
| अविनाशि तु तद्विद्धि | avi-nā-śi tu tad-vid-dhi |
| येन सर्वमिदं ततम् । | ye-na sar-vam-idaṁ ta-tam । |
| विनाशमव्ययस्यास्य | vi-nā-śam-av-ya-yas-yās-ya |
| न कश्चित्कर्तुमर्हति ॥ | na kaś-cit-kar-tum-ar-ha-ti ।। |
| ॥ १७ ॥ | ।। 17 ।। |
| अन्तवन्त इमे देहाः | an-ta-van-ta ime de-hāḥ |
| नित्यस्योक्ताः शरीरिणः । | nit-yas-yok-tāḥ śa-rī-ri-ṇaḥ । |
| अनाशिनोऽप्रमेयस्य | anā-śi-no'-pra-me-yas-ya |
| तस्माद्युध्यस्व भारत ॥ | tas-mād-yudh-yas-va bhā-ra-ta ।। |
| ॥ १८ ॥ | ।। 18 ।। |

ॐ तत्सत्

om tat-sat

इति श्रीमद्भगवद्गीतासु

iti śrīmad-bhaga-vad-gī-tā-su

उपनिषत्सु ब्रह्मविद्यायां

upa-ni-ṣat-su brahma-vid-yā-yāṁ

योगशास्त्रे श्रीकृष्णार्जुनसंवादे

yoga-śās-tre śrī-kṛṣ-ṇār-juna-saṁ-vā-de

साङ्ख्य योगो नाम

sāṅ-khya yo-go nā-ma

द्वितीयोऽध्यायः ।

dvi-tī-yo'dhyā-yaḥ ।

ॐ हरिः ॐ श्री गुरुभ्यो नमः हरिः ॐ

om hariḥ om śrī guru-bhyo namaḥ hariḥ om